# Gauramukhamunikritam Shri Krishnanarayana Stotram

# गौरमुखमुनिकृतं श्रीकृष्णनारायणस्तोत्रम्

## Document Information

Text title : Gauramukhamunikritam Shri Krishnanarayana Stotram

File name : gauramukhamunikRRitaMshrIkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 532/26-34||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# गौरमुखमुनिकृतं श्रीकृष्णनारायणस्तोत्रम्

नमस्ते श्रीकृष्णनारायणायाक्षरधामिने ।
नमस्ते चाद्यरूपाय वीणाधृक् द्विभुजाय च ॥ २६॥

शङ्खचक्रान्वितलक्ष्मीपतयेऽर्थधृगे नमः ।
सर्वप्रदाय दिव्याय भक्तगोप्त्रे च ते नमः ॥ २७॥

पञ्चभूतस्थितायाऽत्र हृदयस्थाय ते नमः ।
आपूरकाय सर्वेषामक्षयाय च ते नमः ॥ २८॥

ब्रह्मव्रतधरायाऽब्धौ शेषस्थाय च ते नमः ।
त्वत्तो भूतमिदं सर्वं सर्वदात्रे च ते नमः ॥ २९॥

त्वत्तो यज्ञस्तथा हव्यं कव्यं भोज्यं च वारि च ।
सर्वं चास्ति शरीरं ते तस्मै भोज्यं प्रदेहि वै ॥ ३०॥

ममाऽत्र श्रीकृष्णनारायण राजा हि दुर्जयः ।
आगतोऽभ्यागतस्तस्य चातिथ्यं कुरु माधव ॥ ३१॥

अहं च तव दासोऽस्मि कुरुष्वन्नादिसञ्चयम् ।
यं यं स्पृशामि हस्तेन यं च पश्यामि चक्षुषा ॥ ३२॥

काष्ठं वा तृणकन्दं वा तत्तदन्नं चतुर्विधम् ।
तथा पेयं जलं मिष्टं दुग्धं दधि घृतादिकम् ॥ ३३॥

तत्सर्वं सिध्यतां मह्यं यद्ध्यातं मनसा मया ।
तवैव तु प्रतापेन भवेदातिथ्यमच्युत ॥ ३४॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ५३२-अध्यायान्तर्गतं गौरमुखमुनिकृतं श्रीकृष्णनारायणस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ५३२/२६-३४॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 532/26-34..

Proofread by PSA Easwaran

*Gauramukhamunikritam Shri Krishnanarayana Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*